# श्री महालक्ष्मी स्तुतिः 2

महालक्ष्म्यष्टोत्तरशतनामस्तोत्रं
ॐ विघ्नेश्वरमहाभाग सर्वलोकनमस्कृत ।
मयाऽऽरब्धमिदं कर्म निर्विघ्नं कुरु सर्वदा ॥
शुद्धलक्ष्म्यै बुद्धिलक्ष्म्यै वरलक्ष्म्यै नमो नमः ।
नमस्ते सौभाग्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥1॥

वचोलक्ष्म्यै काव्यलक्ष्म्यै गानलक्ष्म्यै नमो नमः ।
नमस्ते शृंगारलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥2॥

धनलक्ष्म्यै धान्यलक्ष्म्यै धरालक्ष्म्यै नमो नमः ।
नमस्तेऽष्टैश्वर्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥3॥

गृहलक्ष्म्यै ग्रामलक्ष्म्यै राज्यलक्ष्म्यै नमो नमः ।
नमस्ते साम्राज्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥4॥

शांतलक्ष्म्यै दांतलक्ष्म्यै क्षांतलक्ष्म्यै नमो नमः ।
नमोऽस्त्वात्मानंदलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥5॥

सत्यलक्ष्म्यै दयालक्ष्म्यै सौख्यलक्ष्म्यै नमो नमः ।
नमः पातिव्रत्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥6॥

गजलक्ष्म्यै राजलक्ष्म्यै तेजोलक्ष्म्यै नमो नमः ।
नमः सर्वोत्कर्षलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥7॥

सत्त्वलक्ष्म्यै तत्त्वलक्ष्म्यै बोधलक्ष्म्यै नमो नमः ।
नमस्ते विज्ञानलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥8॥

स्थैर्यलक्ष्म्यै वीर्यलक्ष्म्यै धैर्यलक्ष्म्यै नमो नमः ।
नमस्तेऽस्त्वौदार्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥9॥

सिद्धिलक्ष्म्यै ऋद्धिलक्ष्म्यै विद्यालक्ष्म्यै नमो नमः ।
नमस्ते कल्याणलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥10॥

कीर्तिलक्ष्म्यै मूर्तिलक्ष्म्यै वर्चोलक्ष्म्यै नमो नमः ।
नमस्ते त्वनंतलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥11॥

जपलक्ष्म्यै तपोलक्ष्म्यै व्रतलक्ष्म्यै नमो नमः ।
नमस्ते वैराग्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥12॥

मंत्रलक्ष्म्यै तंत्रलक्ष्म्यै यंत्रलक्ष्म्यै नमो नमः ।
नमो गुरुकृपालक्ष्म्यै महालक्ष्म्यै नमो नमः ॥13॥

सभालक्ष्म्यै प्रभालक्ष्म्यै कलालक्ष्म्यै नमो नमः ।
नमस्ते लावण्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥14॥

वेदलक्ष्म्यै नादलक्ष्म्यै शास्त्रलक्ष्म्यै नमो नमः ।
नमस्ते वेदांतलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥15॥

क्षेत्रलक्ष्म्यै तीर्थलक्ष्म्यै वेदिलक्ष्म्यै नमो नमः ।
नमस्ते संतानलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥16॥

योगलक्ष्म्यै भोगलक्ष्म्यै यज्ञलक्ष्म्यै नमो नमः ।
क्षीरार्णवपुण्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥17॥

अन्नलक्ष्म्यै मनोलक्ष्म्यै प्रज्ञालक्ष्म्यै नमो नमः ।
विष्णुवक्षोभूषलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥18॥

धर्मलक्ष्म्यै अर्थलक्ष्म्यै कामलक्ष्म्यै नमो नमः ।
नमस्ते निर्वाणलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥19॥

पुण्यलक्ष्म्यै क्षेमलक्ष्म्यै श्रद्धालक्ष्म्यै नमो नमः ।
नमस्ते चैतन्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥20॥

भूलक्ष्म्यै ते भुवर्लक्ष्म्यै सुवर्लक्ष्म्यै नमो नमः ।
नमस्ते त्रैलोक्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥21॥

महालक्ष्म्यै जनलक्ष्म्यै तपोलक्ष्म्यै नमो नमः ।
नमः सत्यलोकलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥22॥

भावलक्ष्म्यै वृद्धिलक्ष्म्यै भव्यलक्ष्म्यै नमो नमः ।
नमस्ते वैकुंठलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥23॥

नित्यलक्ष्म्यै सत्यलक्ष्म्यै वंशलक्ष्म्यै नमो नमः ।
नमस्ते कैलासलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥24॥

प्रकृतिलक्ष्म्यै श्रीलक्ष्म्यै स्वस्तलक्ष्मै नमो नमः ।
नमस्ते गोलोकलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥25॥

शक्तिलक्ष्म्यै भक्तिलक्ष्म्यै मुक्तिलक्ष्म्यै नमो नमः ।
नमस्ते त्रिमूर्तिलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥26॥

नमश्चक्रराजलक्ष्म्यै आदिलक्ष्म्यै नमो नमः ।
नमो ब्रह्मानंदलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥27॥

ॐ कनकलक्ष्म्यै नमः ।
उद्योगलक्ष्म्यै नमः ।
सर्वाभीष्टफलप्रदायै नमः ।

इति श्रीमहालक्ष्मीस्तुतिः 2 समाप्ता ।